2ND PROOF

PVG's

# Muktangan English School & Jr. College, Pune - 9

## Preliminary Examination (2024-25)

## Standard - X

| | |
|---|---|
| Subject - Sanskrit (Entire) | Marks - 80 |
| Date - 04/01/2025 | Time : 1.30 pm to 4.30 pm |

### प्रथमः विभाग : सुगमसंस्कृतम् (८)

**प्रश्न १ (अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** **(४)**

१) 

२) 

३) 

४) 

५) 

**(आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** **(२)**

१) ६७ २) २३ ३) अष्टाशीतिः

**इ) समयस्तम्भमेलनं कुरूत । (५ त ४)** **(२)**

| अ | आ |
|---|---|
| १) सार्ध दशवादनम् | ५.४५ |
| २) दशोन अष्टवादनम् | १०.३० |
| ३) सपाद त्रिवादनम् | १.२५ |
| ४) पञ्चविंशत्यधिक एकवादनम् | ३.१५ |
| ५) पादोन षड्वादनम् | ७.५० |

## द्वितीयः विभाग : गद्यम् (२०)

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत् । तदा मार्गे कोऽपि दरिद्रः, मलिनकायः, जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत्। तं दृष्ट्वा शिष्याः तम् 'अपसर, अपसर' इति उच्चैः अवदन् ।

सः मनुष्यः अपृच्छत् – ''अपसर, अपसर'' इति कं वदसि? शरीरं वा आत्मानं वा? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव। तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्मकानि । तर्हि कथं तव शरीरं मम शरीराद् भिन्नम्, अहं च त्वद् भिन्नः?'' वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा। आचार्यः तं प्रणनाम । ज्ञानं तु कस्मादपि ग्राह्यम् । यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्यः तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान् ।

**१) अवबोधनम् । (४ तः ३)** **(३)**

१) कः कं वदति इति वाक्यं पुनर्लिखित्वा लिखत ।
'अपसर, अपसर ।'

२) एकवाक्येन उत्तरत । सर्वेषां शरीराणि कीदृशानि?

३) सत्यं वा असत्यं वा इति वाक्यं पुनर्लिखित्वा लिखत ।
आत्मा तु परमेश्वरस्य अंशः।

४) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?

**२) शब्दज्ञानम् । (३ तः २)** **(२)**

१) गद्यांशात् द्वे अव्यये चिनुत ।

२) **अधोरेखितपदमाधृत्य प्रश्ननिर्माणं कुरुत ।**
<u>ज्ञानं</u> तु कस्मादपि ग्राह्यम् ।

३) **चतुर्थपदं लिखत ।**
दरिद्रः – मनुष्यः :: समानः – ____________

**३) पृथक्करणम् ।** **(२)**

**क्रमेण योजयत ।**

१) आचार्यः तं प्रणनाम ।
२) आचार्यः स्नानार्थम् अगच्छत् ।
३) शिष्याः दरिद्रं मनुष्यम् 'अपसर' इति वदन्ति ।
४) दरिद्रस्य मुखात् वेदान्ततत्त्वस्य सारम् ।

**प्रश्न २ (आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत**

प्रसादः – (अग्रे आगत्य) नमस्ते । अहं रसायनशास्त्रस्य छात्रः। प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम्। तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः । शालायां तद् संस्कृताध्ययनं कृतं तस्य उपयुक्तमाम् अहम् अधुना । अवगच्छामि ।

लीना – अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर – क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिक भारतीयभाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः ।

तनुजा – पार्श्वनिवेदनम् इति मे व्यवसायः संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति । तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीर – भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान – योगशास्त्र – इतिहास – स्थापत्यादिशास्त्राणाम् अध्ययनार्थं विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति ।

**१ ) अवबोधनम् (४ तः ३)** **(३)**

**१) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत**

__________________ ग्रन्थाः संस्कृतभाषया लिखिताः ।

(प्राचीन रसायनशास्त्रस्य / सॉफ्टवेअरस्य)

**२) पूर्णवाक्येन उत्तरं लिखत ।**

आधुनिकभारतीयभाषाणां विश्लेषणे किम् अतीव साहाय्यकरं भवति ?

**३) सत्यम् असत्यं वा इति वाक्यं पुनर्लिखित्वा लिखत ।**

लीनायाः व्यवसायः पार्श्वनिवेदनम् ।

**४) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?**

**२) शब्दज्ञानम् । (३ तः २)** **(२)**

१) गद्यांशात् द्वे षष्ठी–विभक्त्यन्तपदे चित्वा लिखत ।

२) **लकारं लिखत ।** तेन अभिनये निवेदने च प्रभावः **वर्धते ।**

३) **सन्धिविग्रहं कुरुत ।** विदेशेष्वपि =_______________ + _______________

**३) पृथक्करणम् । जालरेखाचित्रं पूरयत ।** **(२)**

___________अध्ययनाय

___________अध्ययनाय

विदेशीयाः जनाः उत्सुकाः

___________अध्ययनाय

___________अध्ययनाय

**प्रश्न २ (इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** **(४)**

नदी (विपाट्) – कः खलु एषः मानवः? अस्मान् किमर्थं वन्दते स्तौति च? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति?

विश्वामित्रः – अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः।

**अथवा**

कर्णः – भगवन्, किं नोक्तम् दीर्घायुर्भवेति? अथवा यदुक्तं तदेव शोभनम् । यतः हतेषु देहेषु गुणाः धरन्ते। भगवन्, किमिच्छसि? किमहं ददामि?

शक्रः – महत्तरां भिक्षां याचे ।

**प्रश्न २ (ई) माध्यमभाषया उत्तरं लिखत (२ तः १)** **(२)**

१) सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः?

२) भूमाता पृथुवैन्यं किम् उपादिशत्?

## तृतीयः विभाग : पद्यम् (१८)

**प्रश्न ३ (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । ( ३ तः २)** **(२)**

१) रामाभिषेके जलमाहरन्त्या
हसात् सृतो हेमघटो युवत्याः ।
सोपनमार्गेण करोति शब्दं
ठंठं ठठं ठं ठठ ठं ठठं ठः ।।

२) तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ।।

३) वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि

**१) पूर्णवाक्येन उत्तरत (केवलम् १)**

१) कस्याः हस्तात् सुवर्णघटः पतितः?

२) जटायुः तीक्ष्णनखाभ्यां व्रणान् कुत्र चकार?

**२) सन्धिविग्रहं कुरुत ।**

तथाप्यादाय = ________________ + ________________

**३) चतुर्थपदं लिखत ।**

हेमघटः – सृतः युवत्याः – ________________

२) जालरेखाचित्रं पूरयत । (२)




**प्रश्न ३ (आ) माध्यमभाषया उत्तरं लिखत । (२ तः १)** (२)

१) 'यथा चतुर्भिः' इति श्लोकस्य स्पष्टीकरणं लिखत ।

२) 'येन केन प्रकारेण' इति उक्तिं स्पष्टीकुरुत ।

**प्रश्न ३ (इ) पद्ये शुद्धे पूर्णे च लिखत (क, ख, तः १, ग, घ तः १)** (६)

१) क) यदा किञ्चिज्ज्ञोऽहं------------- ख) अयं न---------------

२) ग) तावत्--------------------- (घ) वैद्यराज----------------

**प्रश्न ३ (ई) अन्वयं पूरयत।** (२)

अल्पानां________ अपि ________ कार्यसाधिका (विद्यते)।

(यथा) ________ आपन्नैः ________ मत्तदन्तिनः बध्यन्ते ।।

**प्रश्न ३ (उ) माध्यमभाषया सरलार्थं लिखत । (३ तः २)** (४)

१) वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः।।

२) सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवाधर्मो धर्मान् व्याप्नोति सर्वथा ।।

३) यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।

## चतुर्थः विभाग : लेखनकौशलम् (९)

**प्रश्न ४ (अ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत । (५ तः ४)** **(४)**

१) गम् – गच्छ्   २) अलम्   ३) बहिः   ४) कृते   ५) समीपे

**अथवा**

**संस्कृतानुवादं कुरुत । (६ तः ४)**

1) Sanskrit is the oldest language in the world.
2) My friend is a great writer.
3) Today I will go to Nashik.
4) There is a well in our village.
5) I play with my friends in the evening.
6) A rich man lives in that house.

**(आ) ५-८ वाक्यात्मकं निबन्धं लिखत । (३ तः १)** **(५)**

१) मम प्रियः कविः ।
२) मम प्रियः खगः।
३) मम प्रियं पुस्तकम् ।

**अथवा**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णन कुरुत । (मञ्जूषा – बालकः पश्यति, पुस्तिकाः, स्थापयति, धरति, वर्णपेटिका, कूर्चिकाः, कर्गजाः )**



## पञ्चम: विभाग : भाषाभ्यास (१७)

**प्रश्न ५ (अ) तालिकापूर्तिं कुरुत ।** **(८)**

**१) नामतालिकां पूरयत । (६ त: ४)**

| | ए.व. | द्वि. व. | ब.व. | विभक्ति |
|---|---|---|---|---|
| १) | श्रीमत: | – | – | षष्ठी |
| २) | – | भगवद्भ्याम् | – | पञ्चमी |
| ३) | – | – | वणिक्षु | सप्तमी |

**२) सर्वनामतालिकां पूरयत । (६ त: ४)**

| | ए.व. | द्वि. व. | ब.व. | विभक्ति |
|---|---|---|---|---|
| १) | – | सर्वाभ्याम् | – | तृतीया |
| २) | अयम् | – | – | प्रथमा |
| ३) | – | – | एतेभ्य: | चतुर्थी |

**३) क्रियापदतालिका पूरयत। (६ त: ४)**

| | ए.व. | द्वि. व. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|---|
| १) | – | अब्रूतम् | – | मध्यम | लङ् |
| २) | ददातु | – | – | प्रथम | लोट् |
| ३) | याति | – | – | प्रथम | लट् |

**४) धातुसाधित-विशेषण-तालिकां पूरयत। (६ त: ४)**

| | धातु: | क्त | क्तवतु | कृत्या: | शतृ/शानच् |
|---|---|---|---|---|---|
| १) | गम्-गच्छ् (१५५) | – | गतवान् | गमनीय: | – |
| २) | नी-नय् (१३५) | नीत: | – | – | नयन् |
| ३) | मुच्-मुञ्च् (६३५) | – | – | मोच्य: | मुञ्चन् |

**प्रश्न ५ (आ) निर्दिष्टा: कृती: कुरुत (४ त: ३)** **(९)**

१) योग्यरूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत । (५ त: ३)

२) भगवता व्यासेन – (१८) पुराणानि रचितानि । (सङ्ख्यावाचकम्) ।

**२)** आर्यभट्ट: इति भारतर्षेण प्रेषित --------- (१) उपग्रह: (क्रमवाचकम्)

**३)** वर्षस्य --------- (४) परीक्षा भवति । (आवृत्तिवाचकम्)

**४)** --------- (३) महिला: जलमाहर्तुं गच्छन्ति । (सङ्ख्यावाचकम्)

**२) समासानां तालिकापूर्तिं कुरुत । (५ त: ३)**

| सामासिकपदम् | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| १) नीतिनिपुण: | – | सप्तमी तत्पुरुष |
| २) गृहस्थ | – | उपपद तत्पुरुष |
| ३) – | प्रथमम् दिनम् | कर्मधारय: |
| ४) – | विशालौ बाहू यस्य स: | बहुव्रीहि: |
| ५) संन्यासार्थम् | संन्यासाय इति | – |

**३) समानार्थक / विरुद्धार्थक शब्दान् लिखत (५ त: ३)**

१) अम्भ: = ____________ २) नदी = ____________ ३) विस्मृत्य x ____________

४) कृश: x ____________ ५) आशु = ____________

**४) सूचनानुसारं कृती: कुरुत। (५ त: ३)**

१) तस्य अरुचिं दृष्ट्वा सा चिन्तामग्ना अभवत्।
(त्वान्त– अव्ययं निष्कास्य लिखत।)

२) पार्श्वे सूक्ष्मेक्षिका वर्तते । (लङ्लकारे लिखत।)

३) अपि भवती संस्कृतं पाठयति ? (‘भवान्’ स्थाने ‘त्वम्’ योजयत।)

४) स: भल्लूकपात्रे नियोजित:। (बहुवचने लिखत।)

५) सेवक: त्रीणि आसनानि स्थापितवान् । (वाच्यपरिवर्तनं कुरुत।)

## षष्ठः विभाग : अपठितम् (८)

**प्रश्न ६ गद्यांशं पठित्वा कृतीः कुरुत। (६ तः ४)** **(४)**

पुरा अस्माकं देशे बहवः प्रसिद्धाः राजानः अभवन्। तेषु दुष्यन्तः नाम नृपः आसीत् । तस्य भार्या शकुन्तला आश्रमे पुत्रम् अजनयत्। तस्य नाम भरतः आसीत् । भरतः शैशवावस्थायाम् अपि आश्रमे सिंहशावकैः सह क्रीडति स्म। एकदा सः एकस्य सिंहशावकस्य मुखम् उदघाटयत् अवदत् च – ''जृम्भस्व सिंह! दन्तान् ते गणयामि ।'' तत्र तापसीभ्यां निषिद्धः अपि भरतः कथयति स्म – ''नाहं सिंहात् बिभेमि।'' इत्थं आसीत् सः निर्भयः। भरतस्य अभिधानेन एव अस्माकं देशस्य आर्यावर्तस्य नाम 'भारतम्' अभवत् ।

१) **एकवाक्येन उत्तरत ।** भरतस्य मातुः नाम किम् आसीत्?

२) **प्रातिपादिकं लिखत ।** १) मुखम्– २) दन्तान् –

३) **वाक्यं पुनर्लिखित्वा सत्यम् असत्यं वा इति लिखत ।**
भरतः सिंहात् न बिभेति ।

४) **माध्यमभाषया सरलार्थं लिखत।**
तापसीभ्यां निषिद्धः अपि भरतः कथयति स्म।

५) **कारकपरिचयं कुरुत।**
आर्यावर्तस्य नाम <u>'भारतम्'</u> अभवत् ।

६) **गद्यांशात् एकम् अव्ययं चित्वा लिखत ।**

**प्रश्न ६ (आ) पद्यांशं पठित्वा कृतीः कुरुत ।**

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ।।

१) **पूर्णवाक्येन उत्तरत।** **(१)**
पुरुषेण कति दोषाः हातव्याः?

२) **समानार्थक शब्दं लिखत ।** क्रोधः = ________________ **(१)**

३) **जालरेखाचित्रं पूरयत ।** **(२)**

